CC-0. In Public Domain. Digitization by eGangotri

भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचिता

८।

दशावतारस्तुतिः ।

अलेवूरु सीतारामाचार्यविरचितया
अन्वयार्थविवृत्याख्यया व्याख्यया समेता ।

श्रीसोदा वादिराजमठः
उडुपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्वादिराजीयकृतिरत्नमालायां तृतीयं रत्नम् ।

भाविसभीरश्रीमद्वादिराजपूज्यचरणविरचिता

दशावतारस्तुतिः ।

अलेवूरु सीतारामाचार्येण द्वैतवेदान्त-व्याकरणशिरोमणिना,
द्वैतवेदान्तविदुषा, श्रीमन्मध्वसिद्धान्तप्रबोधिनी-
संस्कृतमहापाठशाला-व्याकरणप्रधानाध्यापकेन,
अग्निष्टोमसोमपूर्वकाधानसिद्धाग्निनाऽग्निहोत्रिणा विरचितया
अन्वयार्थविवृत्याख्यया व्याख्यया समेता ।

प्रथमावृत्तिः १९५४

श्रीसोदा वादिराजमठः
उडुपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Publishers:

SRI SODE VADIRAJA MUTT

UDIPI

All Rights Reserved

Printers:

PAVANJE GURU RAO & SONS

SRI KRISHNA PRESS

UDUPI

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचिता

दशावतारस्तुतिः ।

(अश्वधाटी ।)

अलेवूरु सीतारामाचार्यकृतया

अन्वयार्थविवृत्याख्यया व्याख्यया समेता ।

ॐ मत्स्याय नमः

प्रोष्ठीशविग्रह सुनिष्ठीवनोद्धतविशिष्टाम्बुचारिजलधे
कोष्ठान्तराहितविचेष्टागमौघपरमेष्ठीडित त्वमव माम् ।
प्रेष्ठार्कसूनुमनुचेष्टार्थमात्मविदतीष्टो युगान्तसमये
स्थेष्ठात्मशृङ्गधृतकाष्ठाम्बुवाहन वराष्टापदग्रभतनो ॥ १ ॥

श्रीद्वैपायन-भूवराह-तुरगग्रीवात्मक श्रीपतेः
श्रीविश्वोत्तमपूजितस्य चरणौ ध्यात्वा गुरूणां च तौ ।
भावीरोत्तमवादिराजरचितश्रीशावतारस्तुते-
र्धीशुद्धयै तनुतेऽन्वयार्थविवृतिं सीतादिरामाभिधः ॥

प्रोष्ठीशस्य मत्स्यश्रेष्ठस्य विग्रह इव विग्रहो देहो यस्य तादृश ॥ सुष्ठु निष्ठीवनेन धूत्कारेण उद्धतोऽभिवर्धितो विशिष्टाम्बुचारि-जलधिः श्रेष्ठतिमिङ्गिलादिजलचरयुक्तवारिधिर्येन तादृश ॥ कोष्ठा-न्तरे उदरान्तर्भागविशेषे आहिताः स्थापिता विचेष्टा निर्व्या-पारा आगमौघा वेदसमूहा येन तादृशेन वा परमेष्ठिना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्मुखब्रह्मणा ईडित स्तुत ॥ युगान्तसमये प्रलयकाले प्रेष्ठस्याति-प्रियस्यार्कसूनोर्वैवस्वतमनोश्चेष्टार्थं व्यापाराय स्थेष्ठेऽतिस्थिरे आत्म-शृङ्गे स्वीयशिरःशृङ्गे धृतः काष्ठाम्बुवाहनवरो वृक्षमयनौकाश्रेष्ठो येन तादृश ॥ अष्टापदस्य सुवर्णस्य प्रभेव प्रभा यस्य तादृशी तनुर्यस्य तादृश ॥ आत्मविदां ब्रह्मज्ञानिनामतीष्टोतिप्रियः त्वं मां अव रक्ष॥ १ ॥

ॐ हयग्रीवाय नमः

खण्डीभवद्बहुलडिण्डीरजृम्भणसुचण्डीकृतोदधिमहा-
काण्डातिचित्रगतिशौण्डाय हैमरदभाण्डाप्रमेयचरित ।
चण्डाश्वकण्ठमदशुण्डालदुर्हृदयगण्डाभिखण्डकरदो-
श्चण्डामरेश हयतुण्डाकृते दृशमखण्डामलं प्रदिश मे ॥ २ ॥

खण्डीभवतां विशीर्यमाणानां बहुलानां डिण्डीराणां फेनानां जृम्भणेनोद्गमनेन सुचण्डीकृतस्यातिक्रूरीकृतस्य जलधेः महाकाण्डेषु अगाधजलेषु अतिचित्रायां गतौ शौण्ड कुशल ॥ आद्य जगदादि-कारण ॥ हैमानि सुवर्णमयानि रदभाण्डानि (अश्व)रदनाभरणानि यस्य तादृश ॥ अप्रमेयचरित साकल्येनाज्ञेयमहिमन् ॥ चण्डस्य अश्वकण्ठमदशुण्डालस्य हयग्रीवासुराख्यमदगजस्य हृदयगण्डस्य उरःकुम्भस्थलस्याभिखण्डकराभ्यां विभेदकाभ्यां दोर्भ्यां बाहुभ्यां चण्ड ॥ अमरेश । हयतुण्डाकृते हयवदनरूप अखण्डां पूर्णां दृशं धियं मेऽलं प्रदिश ॥ २ ॥

ॐ कूर्माय नमः

कूर्माकृते त्ववतु नर्मात्मपृष्ठधृतभर्मात्ममन्दरगिरे
धर्मावलम्बनसुधर्मासदां कलितशर्मा सुधावितरणात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुर्मानराहुमुखदुर्मायिदानवसुमर्माभिभेदनपटो
घर्मार्ककान्तिवरवर्मा भवान् भुवननिर्माणधूतविकृतिः ॥ ३ ॥

नर्मणा अनायासेन, आत्मनः स्वस्य, पृष्ठे धृतः भर्मात्मा सुवर्णमयो मन्दरगिरिर्मन्दराचलो येन तादृश ॥ दुर्मानानां दुरभिमानानां राहुमुखानां दुर्मायिदानवानां कपटिदैत्यानां सुमर्मणां मर्मस्थानानां विभेदने विदारणे पटो ॥ धर्मः अवलम्बनमाश्रयो येषां तेषां सुधर्मासदां देवानां सुधावितरणात् अमृतदानात् कलितं कृतं शर्म सुखं येन तादृशः ॥ घर्मार्कस्य निदाघसूर्यस्य कान्तिरिव कान्तिर्यस्य तादृशं वरं वर्म कवचं यस्य तादृशः ॥ भुवननिर्माणे(न) धूता निरस्ता विकृतिर्विकारो यस्य तादृशः भवान् तु विशेषेण अवतु रक्षतु ॥ ३ ॥

ॐ धन्वन्तरये नमः

धन्वन्तरेऽङ्गरुचिधन्वन्तरेऽरितरुधन्वंस्तरीभव सुधा-
भान्वन्तरावसथ मन्वन्तराधिकृततन्वन्तरौषधनिधे ।
दन्वन्तरङ्गशुगुदन्वन्तमाजिषु वितन्वन्ममाब्धितनया-
सून्वन्तकात्महृदतन्वन्तरावयवतन्वन्तरातिंजलधौ ॥ ४ ॥

अङ्गरुच्या शरीरकान्त्या धन्वतरे सूर्यवत् स्थित ॥ अरीणां शत्रूणामेव तरूणां धन्वन् मरुदेशस्थानीय ॥ सुधाभानोरमृतकिरणस्य चन्द्रस्य अन्तरे मध्ये आवसथमावासो यस्य तादृश ॥ अन्यं मनुं मन्वन्तरमधिकृत्य वर्तमाने मन्वन्तराधिकृते स्वायम्भुवादिमन्वन्तरे तन्वन्तरमवतारान्तरं यस्य तादृश ॥ मन्वन्तरेऽधिकृतं स्वीकृतमवतारान्तरं यस्येति वा ॥ औषधानां निधे आश्रय । आजिषु युद्धेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दनोर्दानवजनन्या अन्तरङ्गशुचमेव मानसव्यथामेवोदन्वन्तं समुद्रं वितन्वन् कुर्वन् ॥ दानवनाशेन तन्मातुर्दुःखकारक ॥ अब्धितनयाया रमायाः सूनोः पुत्रस्य कामस्यान्तकस्य नाशकस्य रुद्रस्यात्मानं मनो हरन्तीत्यात्महृतः मनोपहारका अतनवोऽकृशा अन्तरावयवा जघनादयो यस्य तादृशं तन्वन्तरं नारायण्याख्यं स्त्रीरूपमवतारान्तरं यस्य तादृश ॥ हे धन्वन्तरे हरे! आर्तिजलधौ दुःखार्णवे तरीभव नौरिव तारको भव ॥ ४ ॥

ॐ नारायण्यै नमः

या क्षीरवार्धिमथनाक्षीणदर्पदितिजाक्षोभितामरगणा-
पेक्षाप्तयेऽञ्जनि वलक्षांशुबिम्बजिदतीक्ष्णालकावृतमुखी ।
सूक्ष्मावलग्नवसनाऽऽक्षेपकृत्कुचकटाक्षाक्षमीकृतमनो-
दीक्षासुराहृतसुधाऽक्षाणि नोऽवतु सुरूक्षेक्षणाद्धरितनुः ॥ ५ ॥

या क्षीरवार्धेः क्षीराम्बुधेः मथनेनाक्षीणोऽनष्टो दर्पो येषां तैर्दितिजैराक्षोभितानामतिशयेन व्यथां प्रापितानां अमरगणानामपेक्षाप्तये इष्टसिद्धयै ॥ वलक्षांशुबिम्बजित् चन्द्रमण्डलजयि अतीक्ष्णालकावृतं मृदुचूर्णकुन्तलालङ्कृतं मुखं यस्यास्तादृशी ॥ सूक्ष्मं मृदुलमवलग्नवसनं परिधानीयवासो यस्यास्तादृशी ॥ आक्षेपकृद्भिर्मनोविक्षेपं कुर्वद्भिः कुचकटाक्षैः अक्षमीकृता अशक्यतया कृता मनोदीक्षा देवानाममृतं न देयमित्यादिसङ्कल्पो येषां तेभ्योऽसुरेभ्यः आहृता अपहृता सुधा यया तादृशी हरितनुः श्रीहरेर्योषिद्रूपमजनि प्रादुर्बभूव ॥ सा नोऽस्माकं अक्षाणि इन्द्रियाणि सुरूक्षेक्षणात् दुर्विषयदर्शनात् तज्जन्यपापात् अवतु ॥ ५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षादियुङ्निगमदीक्षासुलक्षणपरीक्षाक्षमा विधिसती
दाक्षायणी क्षमति साक्षाद्रमाऽपि न यदाक्षेपवीक्षणविधौ ।
प्रेक्षाऽक्षिलोभकरलाक्षारसोक्षितपदाक्षेपलक्षितधरा
साऽऽक्षारितात्मतनुभूक्षारकारिनिटिलाक्षाऽक्षमानवतु नः ॥६॥

शिक्षादिभिर्वेदाङ्गैः युजि युक्ते निगमे दीक्षायां नियमे, सुलक्षणपरीक्षायां लक्षणविषयकयुक्तायुक्तचिन्तायां च क्षमा समर्था विधिसती सरस्वती दाक्षायणी सती, साक्षाद्रमापि लक्ष्मीरपि यस्याः स्त्रीरूपधारिण्या आक्षेपवीक्षणस्य मनोविकारकारिदर्शनस्य विधौ व्यापारे न क्षमति न समर्था ॥ प्रेक्षा प्रकृष्टज्ञाना ॥ अक्षिलोभकरेण नेत्रापहारकेण लाक्षारसोक्षितपदाक्षेपेण जतुरसलिप्तपादविन्यासेन लक्षिता अङ्किता धरा भूर्यया तादृशी ॥ आक्षारितः अकार्यकरणेन सङ्कुचितः (लज्जितः) आत्मतनुभूक्षारकारी निजतनुजस्य कामस्य भस्मकारी निटिलाक्षः शम्भुर्यया तादृशी (स्मरहरस्यापि व्यामोहिका) सा नारायणी अक्षमान् असमर्थान् नः अस्मान् अवतु ॥ ६ ॥

ॐ श्रीवराहाय नमः

नीलाम्बुदाभ शुभशीलाद्रिदेहधर खेला(धृ)हतोदधिधुनी-
शैलादियुक्तनिखिलेलाकटाद्यसुरतूलाटवीदहन ते ।
कोलाकृते जलधिकालाचलावयवनीलाब्जदंष्ट्र धरणी-
लीलास्पदोरुतल मूलाशियोगिवरजालाभिवन्दित नमः ॥७॥

नीलाम्बुदाभ नीलमेघवर्ण ॥ शुभशील ॥ अद्रिसमानदेहधर पर्वतसमानविग्रह॥ खेलया लीलया (धृ)हतः उदधि-धुनी-शैलादियुक्त-निखिलेलाकटः समुद्रनदीपर्वतादिसहितनिखिलभूमिरूपकटः येन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्याद्यसुरस्य आदिहिरण्याक्षस्यैव तूलाटव्याः कार्पासप्रचुरारण्यस्य दहन ॥ जलधिं कलयति क्रीडार्थं स्वीकरोतीति तादृश ॥ अचलावयवा भूम्यवयवा एव नीलाब्जवत् नीलसरोजवत् यस्यां तादृशी दंष्ट्रा प्रान्तदन्तो यस्य तादृश ॥ धरण्याः लीलास्पदं क्रीडाश्रयं ऊरुतलं यस्य तादृश ॥ मूलं कन्दं अश्नन्तीति तेषां योगिवराणां जालेन समूहेनाभिवन्दित हे कोलाकृते वराहरूप ते नमः ॥ ७ ॥

ॐ श्रीनृसिंहाय नमः

दम्भोलितीक्ष्णनखसम्भेदितेन्द्ररिपुकुम्भीन्द्र पाहि कृपया
स्तम्भार्भकासहन डिम्भाय दत्तवर गम्भीरनाद नृहरे ।
अम्भोधिजानुसरणाम्भोजभूपवनकुम्भीनसेशखगराट्-
कुम्भीन्द्रकृत्तिधरजम्भारिषण्मुखमुखाम्भोरुहाभिनुत माम् ॥८॥

दम्भोलिवत् अशनिवत् तीक्ष्णैर्नखैः सम्भेदितः इन्द्ररिपुः हिरण्यकशिपुरेव कुम्भीन्द्रो महागजो येन तादृश ॥ स्तम्भस्यार्भक इव स्तम्भादाविर्भूत ॥ न विद्यते सहनं क्षमा दैत्येषु यस्य तादृश ॥ डिम्भाय बालाय प्रह्लादाय दत्तवर अभीष्टप्रद ॥ गम्भीरनाद गम्भीर (घन) स्वन ॥ अम्भोधिजया लक्ष्म्या अनुस्रियसेऽनुगम्यस इति तादृश अम्भोधिजानुसरण ॥ अम्भोजभूर्ब्रह्मा च, पवनः वायुश्च, कुम्भीनसेशः पन्नगेशः शेषश्च, खगराट् पक्षिराट् गरुडश्च, कुम्भीन्द्रकृत्तिधरो गजेन्द्रकृत्तिवासा रुद्रश्च, जम्भारिः इन्द्रश्च, षण्मुखश्च, तेषां मुखाम्भोरुहैरभिनुत स्तुत नृहरे मां पाहि ॥

ॐ श्रीवामनाय नमः

पिङ्गाक्षविक्रमतुरङ्गादिसैन्यचतुरङ्गावलिप्तदनुजा-
साङ्गाध्वरस्थबलिसाङ्गावपातहृषिताङ्गामरालिनुत ते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शृङ्गारपादनखतुङ्गाग्रभिन्नकनकाङ्गाण्डपातितटिनी-
तुङ्गातिमङ्गलतरङ्गाभिभूतभजकाङ्गाघ वामन नमः ॥ ९ ॥

पिङ्गाक्षविक्रमाः सिंहविक्रमाः तुरङ्गा एव आदयो येषां तैः सैन्यैः सेनायां भवैः चतुरङ्गैः अश्वरथगजपदातिभिः अवलिप्तानां दृप्तानां दनुजानां दानवानां असाङ्गाध्वरे व्यङ्गे यज्ञे तिष्ठति दीक्षते यजमानतयेति तादृशस्य बलेः साङ्गं सदेहं अवपातेन रसातल-लोकप्रवेशेन हृषिताङ्गानां सरोमाञ्चानाममराणामाल्या पङ्क्त्या नुत स्तुत ॥ शृङ्गारस्य सुन्दरस्य पादनखस्य, तुङ्गाग्रेण उन्नतकोटिना भिन्नात् विदारितात् कनकाङ्गाण्डात् हैमब्रह्माण्डात् पततीति तस्या-स्तटिन्या भागीरथ्यास्तुङ्गैरतिमङ्गलैस्तरङ्गैरभिभूतं नाशितं भजका-ङ्गाघं सेवकजनवाञ्छान्तर्देहमलं येन तादृश हे वामन ते नमः ॥

ध्यानार्ह वामनतनो नाथ पाहि यजमानासुरेशवसुधा-
दानाय याचनिक लीनार्थवाग्वशितनानासदस्यदनुज ।
मीनाङ्कनिर्मलनिशानाथकोटिलसमानात्ममौञ्जिगुणकौ-
पीनाच्छसूत्रपद(या)गानातपत्रकरकानम्यदण्डवरभृत् ॥ १० ॥

हे ध्यानार्ह नाथ यजमानस्याध्वरदीक्षितस्यासुरेशस्य बलेः वसु-धायाः भूम्या आदानाय स्वीकाराय याचनिक याच्ञाकर ॥ लीना-र्थाभिर्गूढार्थाभिर्वाग्भिर्वशिताः नानासदस्या ऋत्विग्भूता दनुजा येन तादृश ॥ मीनाङ्कानां कामानां अमलनिशानाथानां निष्कलङ्क-चन्द्रमसां च कोटिवत् लसमान ॥ आत्मनि देहे मौञ्जिगुणो मेख-लादाम च कौपीनं च आत्मसूत्रं यज्ञोपवीतं च पादगानं ऋगादि-पदपाठश्च अथवा पदयानं पादचारश्च आतपत्रं छत्रं च करकं समु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दूकश्च आनम्यः वन्द्यः दण्डवरः दण्डश्रेष्ठश्च एतान् बिभर्तीति तादृश वामनतनो वामनमूर्ते पाहि ॥

ॐ परशुरामाय नमः

धैर्याम्बुधे परशुचर्याधिकृत्तखलवर्यावनीश्वर महा-
शौर्याभिभूतकृतवीर्यात्मजातभुजवीर्यावलेपनिकर ।
भार्यापराधकुपितार्याज्ञया गलितनार्यात्मस्नुगलतरो
कार्याऽपराधमविचार्यार्यमौघजयिवीर्यामिता मयि दया ११

हे धैर्याम्बुधे धैर्यनिधे ! परशुचर्यया कुठारव्यापारेण अधिकृत्ता-श्छिन्नाः खलवर्या अतिदुष्टा अवनीश्वरा राजानो येन तादृश ॥ महाशौर्येणाभिभूतः कृतवीर्यात्मजातभुजवीर्यावलेपनिकरः कार्त-वीर्यार्जुनस्य भुजपराक्रमजातगर्वनिकरः येन तादृश ॥ भार्याया रेणुकाया अपराधेन गन्धर्वराजविहारदर्शनजाततदपेक्षारूपमानसापराधेन कुपितस्यार्यस्य जमदग्नेराज्ञया गलितः (दलितः) छिन्नः नार्याः स्त्रियाः आत्मस्नुवः स्वजनन्या गलः कण्ठ एव तरुर्वृक्षो येन तादृश ॥ अर्यम्णां सूर्याणामोघं समूहं जयतीति जयि जयशीलं वीर्यं पराक्रमो यस्य तादृश परशुराम मयि अमिता दया कार्या ॥

ॐ श्रीरामाय नमः

श्रीराम लक्ष्मणशुक्रारामभूरवतु गौरामलामितमहो-
हारामरस्तुतयशो रामकान्तिसुतनो रामलब्धकलह ।
स्वारामवर्यरिपुवीरामर्यधिकर चीरामलावृतकटे
स्वारामदर्शनजमारामयागतसुघोरामनोरथहर ॥ १२ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मणस्यैव शुकस्य आरामभूः क्रीडायोग्यस्थान ॥ गौरः अमलः अमितमहा अपरिमितकान्तियुक्तः हारो मुक्ताहारो यस्य तादृश ॥ अमरस्तुतयशः देववर्णितकीर्ते ॥ रामा मनोहरा कान्तिर्यस्यास्तादृशी सुतनुः शोभनशरीरं यस्य तादृश ॥ रामेण परशुरामेण सह लब्धः प्राप्तः कलहो यस्य तादृश ॥ स्वः स्वर्गे रमन्त इति तेषां देवानां वर्यस्य श्रेष्ठस्येन्द्रस्य रिपूणां वीराणां दैत्यानामामयर्द्धिं रोगवृद्धिं करोतीति तादृश ॥ चीरामलेन निर्मलवल्कलेनावृता कटिर्यस्य तादृश ॥ स्वस्य स्वकीयस्यारामस्य पञ्चवटीस्थोपवनस्य दर्शनेन जातेन मारामयेन काम-रूपरोगेण अभिगताया अभिमुखमागताया घोराया राक्षस्याः शूर्पणखाया मनोरथं हरति नाशयतीति तादृश ॥ श्रीराम भवान् मामवतु रक्षतु ॥

श्रीकेशव प्रदिश नाकेशजातकपिलोकेशभग्नरविभू-
स्तोकेतरार्तिंहरणाकेवलार्थसुखधीकेकिकालजलद ।
साकेतनाथवरपाकेरमुख्यसुतकोकेन भक्तिमतुलां
राकेन्दुविम्बमुख काकेक्षणापह हृषीकेश तेऽङ्घ्रिकमलें ॥ १३ ॥

नाकेशादिन्द्रात् जातेन कपिलोकेशेन वालिना भग्नस्य ताडितस्य रविभुवः सूर्यजस्य सुग्रीवस्य स्तोकेतरामनल्पामार्तिं दुःखं हरतीति तादृश ॥ अकेवलार्थसुखधियामेव केवलार्थसुखे विषयसुख एव धी-र्ज्ञानं येषां न तादृशानां विषयसुखविमुखानां ब्रह्मविदामेव केकिनां मयूराणां कालजलद कृष्णमेघ इव स्थित ॥ साकेतनाथस्यायोध्याधि-पतेर्दशरथस्य वरपाक अर्भकश्रेष्ठ ॥ ईरमुख्यस्य मुख्यवायोः सुतस्य हनुमत एव कोकस्य चक्रवाकस्य इन सूर्यसदृश ॥ राकेन्दुबिम्बवत् पूर्णेन्दुमण्डलसदृशं मुखं यस्य तादृश ॥ काकानामीक्षणं नेत्रमप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हन्तीति तादृश ॥ हृषीकेश इन्द्रियनियामक श्रीकेशव ब्रह्मरुद्राद्य-धीश श्रीराम तेऽङ्घ्रियुगले अमलां भक्तिं प्रदिश देहि ॥ १३ ॥

रामे नृणां हृदभिरामे नराशिकुलभीमे मनोऽद्य रमतां
गोमेदिनीजयितपोऽमेयगाधिसुतकामे निविष्टमनसि ।
श्यामे सदा त्वयि जितामेयतापसजरामे गताधिकसमे
भीमेशचापदलनामेयशौर्यजितवामेक्षणे विजयिनि ॥ १४ ॥

नृणां हृदभिरामे मनःप्रिये । नराशिनां राक्षसानां कुलस्य भीमे भयङ्करे ॥ गोः स्वर्गस्य मेदिन्याः भूमेश्च जयिना तपसा अमेयस्या-प्रमेयस्य गाधिसुतस्य विश्वामित्रस्य कामेऽभिलषिते निविष्टं मनो यस्य तस्मिन् ॥ श्यामे जितः अमेयः तापसजः जमदग्निजः रामः परशुरामो येन तस्मिन् ॥ गताधिकसमे समाधिकरहिते ॥ भीमस्य भयानकस्य ईशचापस्य शिवधनुषः दलनेन भङ्गेन (प्रकाशितेन) अमेयशौर्येण जिता वशीकृता वामेक्षणा सीता येन तस्मिन् सदा विजयिनि रामे मम मनोऽद्य रमताम् ॥ १४ ॥

ॐ श्रीसीतारूपिण्यै श्रिये नमः

कान्तारगेहखलकान्तारटद्वदनकान्तालकान्तकशरं
कान्ताऽऽर याऽम्बुजनिकान्तान्ववायविधुकान्ताश्मभाधिपहरे।
कान्तालिलोलदलकान्ताभिशोभितिलकान्ता भवन्तमनु सा
कान्तानुयानजितकान्तारदुर्गकटकान्ता रमा त्ववतु माम्॥१५॥

अम्बुजनिकान्तस्य कमलबन्धोः सूर्यस्य अन्ववायस्य वंशस्यैव विधुकान्ताश्मनः चन्द्रकान्तोपलस्य भाधिपः नक्षत्राधिप इव स्थित हरे राम ! कन्तानां मनोज्ञानां अलीनां भ्रमराणामिव लोलतां चलानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अलकानां चूर्णकुन्तलानां अन्ते प्रान्तभागेऽभिशोभी शोभमानस्तिलकान्तः तिलकप्रान्तभागो यस्यास्तादृशी ॥ कान्तं पतिमनुयानेन (अरण्ये) अनुगमनेन जिताः सुखाशाः कान्तारदुर्गकटकान्ताः वनानि दुर्गमाद्रिप्रान्तप्रदेशाश्च यया सा कान्ता त्वत्पत्नीभूता रमा, कान्तारगेहानां अरण्यवासिनां खलानां राक्षसानां कान्तानां भार्याणां राक्षसीनां रटद्वदनेषु आक्रोशद्वक्त्रेषु कान्तानां मनोहराणां अलकानां कुन्तलानां अन्तको नाशकः शरो यस्य तं भवन्तं अनु अनुसृत्य आर ययौ; सा लक्ष्मीर्मामवतु ॥ १५ ॥

दान्तं दशाननसुतान्तं धरामधिवसन्तं प्रचण्डतपसा
क्लान्तं समेत्य विपिनान्तं त्ववाप यमनन्तं तपस्विपटलम् ।
यान्तं भवारतिभयान्तं शमाशु भगवन्तं भरेण भजतात्
स्वान्तं सवारिदनुजान्तं धराधरनिशान्तं सतापसवरम् ॥ १६ ॥

दान्तं जितेन्द्रियं दशाननेन सुतान्तं अत्यन्तं आनिं प्राप्तम् । प्रचण्डतपसा क्लान्तं क्षामं तपस्विपटलं ऋषिसमूहः; धरामधिवसन्तं भूमौ वसन्तं विपिनान्तं वनप्रान्तं यान्तं गच्छन्तं, यं अनन्तं रामरूपं नारायणं समेत्य भवस्य संसारस्य (सम्बन्धिनोः) अरतिभययोः दुःखभीत्योरन्तं नाशमवाप ॥ तं सवस्याध्वरस्य अरीणां शत्रूणां दनुजानां अन्तो नाशो यस्मात्तं । धराधरे चित्रकूटपर्वते निशान्तं उटजो यस्य तादृशं तापसवरैः सह वर्तत इति तादृशं भगवन्तं, मम स्वान्तं मनः आशु भरेण भक्तिभारेण भजतात् ॥ १६ ॥

शम्पाभचापलवकम्पास्तशत्रुबलसम्पादितामितयशाः
शं पादतामरससम्पातिनोऽलमनुकम्पारसेन दिश मे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्पातिपक्षिसहजं पापरावणहतं पावनं यदकृथा-
स्त्वं पापकूपपतितं पाहि मां तदपि पम्पासरस्तटचर ॥ १७ ॥

शम्पाया विद्युतः आभेव आभा यस्य तस्य चापस्य लवकम्पेन ईषच्चलनेन अस्तेन निरस्तेन शत्रुबलेन तन्निमित्तं सम्पादितं अमितं यशो येन तादृशस्त्वं पादतामरससम्पातिनः पादकमलवन्दनशीलस्य मे अनुकम्पारसेन दयारसेन अलं शं सुखं दिश देहि ॥ हे पम्पासर-स्तटचर राम यत् यस्मात् पापेन रावणेन हतं सम्पातिपक्षिसहजं सम्पातिसहोदरं जटायुषं पावनमकृथाः अकरोः तत् तस्मात् पाप-कूपपतितं मामपि पाहि ॥ १७ ॥

लोलाक्ष्यपेक्षितसुलीलाकुरङ्गवधखेलाकुतूहलगते
स्वालापभूमिजनिबालापहार्यनुजपालाद्य भो जय जय ।
बालाग्निदग्धपुरशालानिलात्मजनिफालात्तपत्तलरजो
नीलाङ्गदादिकपिमालाकृतालिपथमूलाभ्यतीतजलधे ॥ १८ ॥

लोलाक्ष्या सीतया अपेक्षितस्य सुलीलाकुरङ्गस्य चातुर्ययुक्त-हरिणस्य मारीचस्य वधाय खेलयैव क्रीडयैव कुतूहलेन विशिष्टा गतिर्यस्य तादृश ॥ सुष्ठु आलापो यस्यास्तस्या मधुरभाषिण्या भूमि-जनेः भूमिपुत्र्याः सीतायास्तादृश्या बालाया अपहर्तृ रावणस्यानुजं विभीषणं पालयतीति तादृश ॥ अद्य जगदादिकारण बालाग्निना पुच्छवह्निना दग्धा पुरस्य लङ्कापुरस्य शाला चन्द्रशालादिर्येन तस्या-निलात्मजनेर्वायुपुत्रस्य फालेन ललाटेन आत्तं स्वीकृतं पत्तलरजः पादधूलिर्यस्य तादृश ॥ नीलाङ्गदादिकपिमालया कृतस्य आलिपथस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सेतुमार्गस्य मूलेन निमित्तेनाभ्यतीतस्तीर्णो जलधिर्येन तादृश भो राम जय जय ॥ १८ ॥

तूणीरकार्मुककृपाणीकिणाङ्कभुजपाणी रविप्रतिमभाः
क्षोणीधरालिनिभघोणीमुखादिघनवेणीसुरक्षणकरः ।
शोणीभवन्नयनकोणीजिताम्बुनिधिपाणीरितार्हणमणि-
श्रेणीवृताङ्घ्रिरिह वाणीशसूनुवरवाणीस्तुतो विजयते ॥ १९ ॥

तूणीरकार्मुककृपाणीनां निषङ्गचापखड्गानां (धारणजन्याः)किणा एवाङ्का यस्य तादृशं भुजपाणि बाहुहस्तं यस्य तादृशः ॥ रविप्रतिमभाः सूर्यसमानतेजाः क्षोणीधरालिनिभानां पर्वतश्रेणिसदृशानां घोणीमुखादीनां कपिप्रभृतीनां घनवेण्याः सेनायाः सुरक्षणकरः ॥ शोणीभवतोः क्रोधरक्तायितयोर्नयनयोः कोण्या प्रान्तभागेन जितस्य अम्बुनिधेः समुद्राभिमानिनो वरुणस्य पाणिभ्यामीरितया समर्पितया अर्हणमणिश्रेण्या उपहाररत्नपङ्क्त्या वृतावाच्छादितावङ्घ्री पादौ यस्य सः वाणीशसूनोः भारतीपतिपुत्रस्य हनुमतो वरवाण्या मूलरामायणादिरूपवाचा स्तुतो रामः इह भुवि विजयते ॥ १९ ॥

हुङ्कारपूर्वमथ टङ्कारनादमतिपङ्काऽवधार्य चलिता
लङ्का शिलोच्चयविशङ्कापतद्भिदुरशङ्काऽऽस यस्य धनुषः ।
लङ्काधिपोऽमनुत यं कालरात्रिमिव शङ्काशताकुलधिया
तं कालदण्डशतसङ्काशकार्मुकशराङ्कान्वितं भज हरिम् ॥ २० ॥

अथ यस्य रामस्य हुङ्कारपूर्वं धनुषष्टङ्कारनादं अवधार्य श्रुत्वा अतिपङ्का पापजनाधीनतया पापभूमिर्लङ्का तदभिमानिनी वा । शिलोच्चये पर्वते विशङ्कं निःशङ्कं आपतत् भिदुरमिति वज्रमिति शङ्का यस्यास्ता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृशी सती चलिता कम्पिता आस बभूव ॥ लङ्काधिपो रावणः शङ्का-
शतेन आकुलया धिया यं रामं कालरात्रिमिव कालमृत्युमिव अम-
नुत ॥ तं कालदण्डशतस्य यमदण्डशतस्य सदृशानां कार्मुकाणां
धनुषां, शराणां बाणानां, च अङ्केन अन्वितं हरिं(हे मनः)भज॥२०॥

धीमानमेयतनुधामाऽऽर्तमङ्गलदनामा रमाकमलभू-
कामारिपन्नगपकामाहिवैरिगुरुसोमादिवन्द्यमहिमा ।
स्थेमादिनाऽपगतसीमाऽवतात्सखलसामाजरावणरिपू
रामाभिधो हरिरभौमाकृतिः प्रतनसामादिवेदविषयः ॥ २१ ॥

धीमान् अमेयं ज्ञातुमशक्यं तनुधाम शरीरकान्तिर्यस्य सः ।
आर्तानां दुःखितानां मङ्गलदं नाम यस्य सः ॥ रमा च कमलभूश्च
कामारिः रुद्रश्च, पन्नगपः शेषश्च, कामश्च, अहिवैरी वृत्रहा च,
गुरुर्बृहस्पतिश्च, सोमश्चैते आदयो येषां तैर्वन्द्यो महिमा यस्य सः ।
स्थेमादिना पालनादिना अपगतसीमा गतमर्यादोऽप्रमेयः । सखल-
समाजस्य दुष्टामात्यादिसामाजसहितस्य रावणस्य रिपुः ॥ अभौमा
अप्राकृता आकृतिर्विग्रहो यस्य सः ॥ प्रतनानां पुरातनानां सामादि-
वेदानां विषयः प्रतिपाद्यः रामाभिधो रामनामा हरिर्मामवतात् ॥ २१ ॥

दोषाऽऽत्मभूवशतुरासाडतिक्रमजरोपात्मभर्तृवचसा
पाषाणभूतमुनियोषावरात्मतनुवेषादिदायिचरणः ।
नैषादयोषिदशुभेषाकृदण्डजनिदोषाचरादिशुभदो
दोषाऽग्रजन्ममृतिशोषापहोऽवतु सुदोषाङ्घ्रिजातहननात्॥२२॥

दोषा रात्रौ आत्मभूवशस्य मनोभवपरवशस्य तुरासाहः इन्द्रस्या-
तिक्रमात् जायते इति अतिक्रमजः भार्यापातिव्रत्यभङ्गानुकूलव्यापा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रजः रोषः यस्य तस्य आत्मभर्तुः स्वपतेर्गौतमस्य वचसा शापरूप-वचनेन पाषाणभूतायाः शिलीभूतायाः मुनियोषाया अहल्याया वरात्म-तनुवेषादीनां उत्तमस्वशरीराभरणादीनां दायिनौ दानशीलौ चरणौ यस्य तादृशः। नैषादयोषित् शबरी च, अशुभस्य कुणपादेरीषामिच्छां करोतीति सोऽण्डजनिः पक्षी जटायुश्च दोषाचरो रात्रिचरो विभी-षणश्च एते आदयो येषां तेषां शुभदो मङ्गलदः॥ दोषा दोष्णा, सुदोषस्याङ्गिजातस्य दुष्टशूद्रतापसस्य हननात् अग्रजन्मनः विप्रपुत्रस्य मृतिरूपशोषं शोषणमपहन्तीति तादृशो रामो (मां) अवतु॥ २२॥

ॐ श्रीकृष्णाय नमः

वृन्दावनस्थपशुवृन्दावनं विनुतवृन्दारकैकशरणं
नन्दात्मजं निहतनिन्दाकृदासुरजनं दामबद्धजठरम्।
वन्दामहे वयममन्दावदातरुचिमन्दाक्षकारिवदनं
कुन्दालिदन्तमुत कन्दासितप्रभतनुं दावराक्षसहरम्॥ २३॥

वृन्दावनस्थानां पशूनां वृन्दमवतीति तं विनुतानां स्वावरैः स्तुतानां वृन्दारकाणां देवानामेकं मुख्यं शरणं रक्षकं निहताः नाशिताः निन्दाकृतः आसुरजना येन तं। दाम्ना रज्ज्वा बद्धं जठरं यस्य तं॥ अमन्दावदातरुचेरमितशुभ्रकान्तेश्चन्द्रस्य मन्दाक्षकारि लज्जाकरं वदनं यस्य तं। कुन्दालिरिव कुन्दकुसुमसमूह इव शुभ्राः दन्ता यस्य तं॥ कं जलं ददातीति कन्दो मेघस्तद्वत् असिता नीला प्रभा यस्या-स्तादृशी तनुर्यस्य तं॥ दावे वने राक्षसान् हरतीति तं नन्दात्मजं उत पुनर्वयं वन्दामहे नमस्कुर्मः॥ २३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गोपालकोत्सवकृतापारभक्ष्यरससूपान्नलोपकुपिता-
शापालयापितलयापाम्बुदालिसलिलापायधारितगिरे ।
स्वापाङ्गदर्शनजतापाङ्गरागयुतगोपाङ्गनांशुकहृति-
व्यापारशौण्ड विविधापायतस्त्वमव गोपारिजातहरण॥ २४ ॥

गोपालकानां नन्दादीनां उत्सवे तत्कर्तृके इन्द्रयागे कृतानामपाराणां बहूनां भक्ष्याणां भक्षितुं योग्यानां पोलिकादीनां, रसानां पायसादीनां, सूपानां व्यञ्जनविशेषाणां, अन्नानां शाल्योदनादीनां लोपेन कुपितेन आशापालेन दिक्पतिना इन्द्रेण यापितानां प्रेषितानां लयापाम्बुदानां प्रलयजलसदृशजलवतां मेघानां आलेः समूहस्य सलिलानामपायाय परिहारार्थं धारितः गिरिर्गोवर्धनो येन तादृश ॥ स्वापाङ्गेन स्वकटाक्षेण दर्शनेन जायत इति तादृशेन तापेन मदनसन्तापेन च, अङ्गरागेण च परिमलद्रव्येण च युतानां गोपाङ्गनानां अंशुकहृतौ वस्त्रापहरणे तद्रूपव्यापारे शौण्ड चतुर ॥ गोपानां अरिजातस्य व्योमासुरादिशत्रुसमूहस्य; गोः स्वर्गस्य पारिजातस्य वा हरण कृष्ण ! त्वं विविधापायतो नानादुःखात् अव रक्ष ॥ २४ ॥

कंसादिकासदवतंसावनीपतिविहिंसाकृतात्मजनुषं
संसारभूतमिहसंसारबद्धमनसं सारचित्सुखतनुम् ।
संसाधयन्तमनिशं सात्विकव्रजमहं सादरं वत भजे
हंसादितापसरिरंसास्पदं परमहंसादिवन्द्यचरणम् ॥ २५ ॥

इह कंसादिकानामसदवतंसानां असज्जनशिरोरत्नस्थानीयानां अवनीपतीनां राज्ञां विहिंसायै कृतः आत्मजनुः स्वावतारो यस्य तं । संसारभूतं सम्यक् सारभूतं सर्वोत्तमं संसारे सम्यक् श्रेष्ठे भक्तजने बद्ध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मासक्तं मनो यस्य तं सात्विकानां व्रजं; सारे श्रेष्ठे चित्सुखे ज्ञानानन्दावेव तनुर्यस्य तादृशं मुक्तं संसाधयन्तं कुर्वन्तम् । हंसादीनां कुटीचकबहूदकादीनां तापसानां संन्यासिनां रिरंसायाः आस्पदं स्थानभूतम् ॥ परमहंसादिभिः सनकादिभिः योगिभिर्वन्द्यौ चरणौ यस्य तादृशं कृष्णमनिशं सादरमहं वत हन्त (हर्षेण) भजे ॥

राजीवनेत्र विदुराजीव मामवतु राजीवकेतनवशं
वाजीभपत्तिनृपराजीरथान्वितजराजीवगर्वशमन ।
वाजीशवाह सितवाजीश दैत्यतनुवाजीशभेदकरदो-
र्जाजीकदम्बनवराजीवमुख्यसुमराजीसुवासितशिरः ॥ २६ ॥

राजीवनेत्र कमलनेत्र, विदुराणां ज्ञानिनां विदुरस्य तन्नामकस्य वा आजीव रक्षक । वाजिनः अश्वाश्च इभाः गजाश्च पत्तयः पदातयश्च नृपराजी राजसमूहश्च रथाश्च तैरन्वितस्य जराजीवस्य जरया तन्नामकस्त्रिया जीवतीति तस्य जरासन्धस्य गर्वस्याहङ्कारस्य शमन नाशक । वाजिनां पक्षिणामीशो गरुडः वाहो वाहनं यस्य तादृश ॥ सितवाजिनः श्वेताश्वस्यार्जुनस्येश ॥ दैत्यतनोर्दैत्यरूपस्य वाजीशस्याश्वश्रेष्ठस्य भेदकरो दोर्भुजो यस्य तादृश ॥ जाजी च कदम्बश्च नवराजीवं नूतनकमलं च एतन्मुख्यानां सुमानां कुसुमानां राज्या समूहेन सुवासितं सुगन्धीकृतं शिरो यस्य तादृश ॥ श्रीकृष्ण भवान् राजीवकेतनस्य मीनकेतनस्य कामस्य वशमधीनं मां अवतु ॥

कालीह्रदावसथकालीयकुण्डलिपकाऽऽलीस्थपादनखरा-
व्यालीनवांशुकरवालीगणारुणितकालीरुचे जय जय ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केलीलवापहृतकालीशदत्तवरनालीकदृप्तदितिभू-
चूलीक गोपमहिलाऽऽलीतनूघुसृणधूलीकणाङ्कहृदय ॥ २७ ॥

कालीहृदे यमुनागाधजले, आवसथं आवासो यस्य तस्य काली-यस्य तन्नामकस्य कुण्डलिपस्य नागराजस्य कानां शिरसां आल्यां पङ्क्त्यां तिष्ठतीति तत्रस्थस्य पादस्य नखराणामेव अव्यानां सूर्याणां आलीनां पङ्क्तीनां नवांशूनामेव नूतनकिरणानामेव करवालीनां खड्गानां गणेन समूहेनारुणिता कालीरुचिर्यमुनाकान्तिर्येन तादृश। केलीलवेन क्रीडालेशेन अपहृताः कालीशदत्तवरनालीकदृप्तदितिभू-चूलिकाः कालीशेन पार्वतीपतिना दत्तेन वरनालीकेन अलीकेतरेण अतिप्रियेण वरेण दृप्तानां दितिभुवां दैत्यानां चूलीकाः चूडाः येन तादृश ॥ गोपमहिलानां गोपस्त्रीणां आल्यास्तनूघुसृणधूलीनां देह-लिप्तगन्धद्रव्यरजसां कणस्य अङ्कः चिह्नं यस्य तादृश ॥ श्रीकृष्ण जय जय ॥ २७ ॥

कृष्णादिपाण्डुसुतकृष्णामनःप्रचुरतृष्णासुतृप्तिकरवाक्
कृष्णाङ्कपाऽऽलिरत कृष्णाभिधाघहर कृष्णादिपण्महिल भोः।
पुष्णातु मामजित निष्णातवार्धिमुदनुष्णांशुमण्डल हरे
जिष्णो गिरीन्द्रधर विष्णो वृषावरज धृष्णो भवान् करुणया ॥

कृष्णादिपाण्डुसतानां भीमादिपाण्डुपुत्राणां कृष्णाया द्रौपद्याश्च मनसः प्रचुरतृष्णायाः दुर्योधनादिहननेच्छायाः सुतृप्तिकरी वाक् यस्य तादृश ॥ कृष्णाङ्कान् हरेः शङ्खचक्रादिचिह्नानि पान्ति धारणेन रक्ष-न्तीति तादृशानां सुजनानां आलौ समूहे रत ॥ अघहर पापहर ॥ कृष्णादयो यमुनादयः षण्महिलाः षट्स्त्रियो यस्य तादृश । अजित ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निष्णातस्यैव निजैकनिष्ठभक्तवर्गस्यैव वार्धेः समुद्रस्य मुदि सन्तोषे विषये अनुष्णांशुमण्डल चन्द्रमण्डलसदृश ॥ जिष्णो जयशील, गिरीन्द्रधर गोवर्धनधर, विष्णो व्याप्त, वृषावरज इन्द्रावरज ॥ धृष्णो धैर्यशील, कृष्णाभिध कृष्णनामक, भो हरे, भवान् करुणया मां पुष्णातु वर्धयतु ॥ २८ ॥

रामाशिरोमणिधरामासमेत बलरामानुजाभिध रतिं
व्योमासुरान्तकर ते मारतात दिश मे माधवाङ्घ्रिकमले ।
कामार्तभौमपुररामावलिप्रणयवामाक्षिपीततनुभा
भीमाहिनाथमुखवैमानिकाभिनुत भीमाभिवन्द्यचरण ॥ २९ ॥

रामाणां सुन्दरीणां शिरोमणिभ्यां शिरोरत्नस्थानीयाभ्यां धरामाभ्यां भूश्रीदेवीभ्यां समेत । बलरामानुज इत्यभिधा अभिधानं यस्य तादृश ॥ व्योमासुरस्यान्तकर नाशक ॥ मारतात कामपितः । कामार्तानां भौमपुररामाणां नरकासुरपुरस्थशताधिकषोडशसहस्रसुन्दरीणामावल्या पङ्क्त्या प्रणयेन प्रीत्या वामाक्षिभिः सुन्दरनयनैः पीता आस्वादिता तनुभाः शरीरकान्तिर्यस्य तादृश ॥ भीमो रुद्रः अहिनाथः शेष एतौ मुखे मुख्यौ येषां तैर्वैमानिकैर्देवैरभिनुत स्तुत ॥ भीमेन भीमसेनेन वन्द्यौ चरणौ यस्य तादृश ॥ माधव तेऽङ्घ्रिकमले मे रतिं भक्तिं दिश ॥ २९ ॥

सक्ष्वेलभक्ष्यभयदाक्षिश्रवोगणजलाक्षेपपाशयमनं
लाक्षागृहज्वलनरक्षोहिडिम्बवकभैक्षान्नपूर्वविपदः ।
अक्षानुबन्धभवरूक्षाक्षरश्रवणसाक्षान्महिष्यवमती
कक्षानुयानमधमक्ष्मापसेवनमभीक्ष्णापहासमसताम् ॥ ३० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चक्षाण एव निजपक्षाग्रभूदशशताक्षात्मजादिसुहृदा-
माक्षेपकारिकुनृपाक्षौहिणीशतबलाक्षोभदीक्षितमनाः ।
तार्क्ष्यासिचापशरतीक्ष्णारिपूर्वनिजलक्ष्माणि चाप्यगणयन्
वृक्षालयध्वजरिरक्षाकरो जयति लक्ष्मीपतिर्यदुपतिः ॥ ३१ ॥

सक्ष्वेलं विषसहितं भक्ष्यं च, भयदानां भयानकानां अक्षिश्रवसां सर्पाणां गणश्च, जलाक्षेपः गङ्गाजलह्रदे निपातनं च, पाशयमनं वारुण-पाशबन्धनं च, एतेषां समाहारं ॥ लाक्षागृहज्वलनं जतुगृहदाहश्च, रक्षसी हिडिम्बबकौ च, भैक्षान्नं एकचक्रानगरे भिक्षालब्धान्नं च एतत्पूर्वा विपदः आपदः ॥ अक्षानुबन्धे द्यूतसम्बन्धे भवं रूक्षाक्षरश्रवणं अश्लीलवाक्यश्रवणं च साक्षान्महिष्यवमतिः प्रत्यक्षं भार्यावमाननं चेति एते ॥ कक्षानुयानं वनं प्रति गमनं ॥ अधमानां क्ष्मापानां विराटादिराजानां सेवनं ॥ असतां दुःशासनादीनां अभीक्ष्णा-पहासं पुनः पुनः परिहासं च चक्षाण एव पश्यन्नेव निजपक्षस्या-त्मीयस्य भीमस्याग्रभूः अग्रजः युधिष्ठिरश्च दशशताक्षात्मजः सहस्राक्ष-सूनुरर्जुनश्च आदिर्येषां तेषां सुहृदामाक्षेपकारिणां द्वेषिणां कुनृपाणां दुष्टभूपतीनां अक्षौहिणीशतबलस्य बहुसैन्यस्याक्षोभे हिंसने दीक्षितं मनो यस्य सः ॥ तार्क्ष्यो गरुडश्च असिः नन्दकाख्यखड्गश्च चापः शार्ङ्गं च शरा बाणाश्च तीक्ष्णारि रूक्षचक्रं च एतान्येव पूर्वाणि येषां तादृशानि निजलक्ष्माणि स्वायुधान्यप्यगणयन् वृक्षालयः हनू-मान् ध्वजो यस्य तस्यार्जुनस्य रिरक्षां रक्षणेच्छां करोतीति सः लक्ष्मी-पतिर्यदुपतिर्जयति ॥ ३० ॥ ३१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ॐ बुद्धाय नमः ॐ कल्किने नमः

बुद्धावतार कविबद्धानुकम्प कुरु बद्धाञ्जलौ मयि दयां
शौद्धोदनिप्रमुखसैद्धान्तिकासुगमबौद्धागमप्रणयन ।
क्रुद्धाहितासुहृतिसिद्धासिखेटधर शुद्धाश्वयान कमला-
शुद्धान्त मांरुचिपिनद्धाखिलाङ्ग निजमद्धाऽव कल्क्यभिध भोः॥

शौद्धोदनिप्रमुखैः शुद्धोदनपुत्रमुखैः सैद्धान्तिकैः स्वसिद्धान्त-प्रकाशकैरसुगमस्य ज्ञातुमशक्यस्य बौद्धागमस्य देवप्रियशास्त्रस्य प्रणयन निर्मातः । कविषु ज्ञानिषु बद्धानुकम्प कृतदय । बुद्धावतार बुद्धनामकहरे ! बद्धाञ्जलौ मयि दयां कुरु ॥ क्रुद्धानां अहितानां द्वेषिणां असूनां प्राणानां हृतौ अपहारे सिद्धौ सन्नद्धौ असिखेटौ खड्गचर्मणी धरतीति तादृश ॥ शुद्धाश्वो निर्मलो वाजी यानं वाहनं यस्य तादृश ॥ कमला लक्ष्मीः शुद्धान्तेऽन्तःपुरे यस्य तादृश ॥ रुचिभिः कान्तिभिः पिनद्धानि युक्तानि अखिलान्यङ्गानि यस्य तादृश ॥ कल्क्यभिध कल्किनामक भो हरे निजं मां अद्धा साधु अव ॥ ३२ ॥

ॐ नारायणाय नमः

सारङ्गकृत्तिधरसारङ्गवारिधर सारङ्गराजवरदा-
सारं गदारितरसाऽरं गतात्ममदसारं गतौषधबलम् ।
सारङ्गवत्कुसुमसारं गतं च तव सारङ्गमाङ्घ्रियुगलं
सारङ्गवर्णमपसारङ्गताब्जमदसारं गदिंस्त्वमव माम् ॥ ३३ ॥

सारङ्गकृत्तिधराणां एणाजिनधराणां ऋषीणामेव सारङ्गाणां चातकानां वारिधर मेघ ॥ सारङ्गराजस्य गजराजस्य वरद ॥ हे गदिन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गदाधर हरे ! त्वं गदारितरसा भवरोगाख्यशत्रुवेगेन असारं दुर्बलं अरं अलं गतात्ममदसारं गतः नष्टः आत्ममदसारः अहम्भावरूपमदातिशयो यस्य तं गतौषधबलं संसारनिवृत्त्युपायसामर्थ्यरहितं कुसुमसारं प्रति पुष्परसं प्रति सारङ्गवत् भ्रमरवत्; अपसारंगतोऽपसरणं प्राप्तोऽब्जानां मदसारः सौन्दर्यगर्वातिशयो येन तत् सारङ्गवर्णं शबलं तव सारङ्गमाङ्घ्रियुगलं सारे श्रेष्ठे वैकुण्ठादिलोके गच्छतीति तादृशं अङ्घ्रियुगलं पदद्वन्द्वं (प्रति) गतं शरणं गतं च मामव ॥ ३३ ॥

श्रीवास्यवाहतनुदेवाण्डजादिदशभावाभिरामचरितं
भावातिभव्यशुभधीवादिराजयतिभूवाग्विलासनिलयम् ।
श्रीवागधीशमुखदेवाभिनम्यहरिसेवार्चनेषु पठता-
मावास एव भविताऽवाग्भवेतरसुरावासलोकनिकरे ॥ ३४ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता दशावतारस्तुतिः समाप्ता

भावेन भक्त्या अतिभव्या अतिपूज्या शुभधीः मङ्गलबुद्धिर्यस्य तस्मात् वादिराजयतेः भवतीति भुवः उत्पन्नस्य वाग्विलासस्य वाक्चातुर्यस्य निलयमाश्रयम् । ग्रीवा च आस्यं च तयोः समाहारस्तस्मिन् कण्ठमुखे वाहः अश्व इव यस्यास्तादृशी तनुर्यस्य तस्य देवस्य हयग्रीवस्य अण्डजादिदशभावानां मत्स्यादिदशरूपाणां अभिरामं चरितं रम्यचरितं श्रीवागधीशमुखदेवैः ब्रह्मादिसुरैरभिनम्यस्य वन्द्यस्य हरेः सेवार्चनेषु पूजादिषु (तत्काले) पठतां अवाग्भवात् दक्षिणदिग्भवात् यमात् इतरेषामन्येषां सुराणां इन्द्रादिदेवानामावासलोकनिकरे स्वर्गादिलोकसमुदाय एव आवासः स्थितिर्भविता भविष्यति ॥ ३४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीमत्सोदामठाधीशविश्वोत्तमयतीशभाक् ।
सीतारामो व्यधाद्व्याख्यां गुरुवर्यकृपाबलात् ॥
क्व नु भाविभारतीराण्मुखरङ्गादृतभारतीविलासः ।
काहं मन्दमनीषी सुजनो मे साहसं सहताम् ॥

इति श्री अलेबूरु सीतारामाचार्यविरचिता
अन्वयार्थविवृत्याख्या व्याख्या समाप्ता ॥

पञ्चदशतमजनक-मायामालवगौळजन्यः
रागः– सारंगनाटिः– अट्टतालः
रागसञ्चारः- आ०- स रि म प द सं
अव०- सं नि सं द प म ग रि स ॥

श्रीमद्वादिराजपूज्यचरणविरचितः संस्कृतसूत्रार्थः

मन्दभाग्य मनुज त्वं क । हरिरस्मी- ॥ त्यन्ध न वद न वद भो ॥ हे ॥
'भिन्नोचिन्त्य' इति सुदृढं, वेदवाक्यं॥'अन्यमीशमि'ति च श्रुतिं 'द्वासु-
पर्णेति' सुगमनिगमं, नेति नेतीति॥ भिन्नोक्तिं किं नो पश्यसि ॥हे॥
'तद्गुणसारत्वात्तद्व्यादः,' इति ह्यस्मिन् ॥ अध्यात्मसम्बन्धभूमेति ।
अद्वैतवाक्यानां हि गतिः, ब्रह्मसूत्र-॥ मध्ये स्पष्टमुदिता ॥ हे॥ २ ॥
'भेदव्यपदेशाच्चान्य,' उभयेऽपि ॥ भेदेनैनमधीयते विशेषेण ।
भेदव्यपदेशाभ्यां चेति, ब्रह्मसूत्र-॥साधितार्थं किंनत्वमवेक्षसे॥हे॥ ३॥
सह ब्रह्मणा विपश्चिता, परंज्योति- ॥ महदुपसम्पद्येति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुहुर्मुक्तगतं च भेदं, बोधयन्तीं ॥ रहस्योक्तिं मनो वेद न ते ॥ हे ॥४॥
नास्ति हि नारायणसमं, भाविभूतं ॥ नास्ति केशवात्परं दैवम् ॥
उत्तमः पुरुषस्त्वन्यः, परमात्मे- ॥ त्युक्तिर्हि महाभारते ॥ हे ॥ ५ ॥
'भेददृष्ट्याऽभिमानेन,' 'विद्याऽऽत्मनि ॥ भिदाबोध' इति कथं ते ।
'त्वदन्यो नान्योऽस्ती 'त्यन्याभेद- ॥ वादो भागवतवाचा ॥ हे ॥ ६ ॥
पादप्रक्षालनकृद्धाता, यत्पादोद- ॥ मादरेण धत्ते हि शम्भुः ।
आदौ नाभिजन्मा स विधिः, सद्यो जातो ॥ रोदनाद्रुद्रो हि गिरिशः ॥हे॥
'सहस्रशीर्षा पुरुषः,' न ते विष्णो । महिम्नोऽन्तं परो मात्रया ।
अहो 'विष्णोर्नुकं वीर्याणी'त्यादिवेदं।दहसि किं कुमतप्रिय, अज्ञ॥ हे ॥
अज्ञानं च क्व सर्वज्ञस्य, तज्ज्ञानी चाज्ञानतः कथं मुक्तः ।
अज्ञ, दोषिसङ्गतो दोषो, भवतीति । प्राज्ञवादं किं न जानासि ॥ हे ॥
मामेव ये प्रपद्यन्ते, मायामेतां । धीमन्तस्ते तरन्त्येवेति ।
श्रीमद्गीतावचनेन विरुद्धं च । तामसेन्द्र! हरेरज्ञानं ॥ हे ॥ १० ॥
विलज्जमानया यस्य, स्थातुमीक्षा- । स्थलेऽमुया मायया ।
अलं हि मोहिता इति हि, भागवते ॥ जलजसम्भववचनं ॥हे॥ ११॥
शिशुभावे पर्वतधारी, तदैवोग्र- ॥ विषधरमर्दनपटुः ।
असुरारिरसि कथं त्वं, दीनमर्त्यः । स सिन्धुबन्धनविहारी ॥हे॥ १२ ॥
हरिनामभीतकिङ्कराः, किं रे वद । हरिमेव नराः किं घ्नन्ति ।
गुरुमध्वमतमेव त्वं, सर्वसारं । स्मर हयवदनप्रियं अज्ञ ॥ हे ॥ १३ ॥

पावंजे गुरुराव् अण्ड् सन्स् इत्येतैः श्रीकृष्णमुद्रणालये मुद्रितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh